दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रशुक्ल-एकादशी-द्वादशी
चैत्र 15 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-156 | 1 | मार्च 29, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 पश्चिम-एशिया-क्षेत्रे युद्धस्य स्थितिः अतीव गभीरा वर्तते

3 हिम-केयर' योजनातः लक्षशः जनाः नवजीवनं प्राप्तवन्तः, योजनां कलङ्कयितुं प्रयतते सर्वकारः - जयरामठाकुरः

4 केन्द्रीय- जम्मू- विश्वविद्यालये श्रीअरविन्दस्य मानवैक्यदर्शनविषये द्विदिवसीया राष्ट्रीयसंगोष्ठी सम्पन्ना

## प्रधानमन्त्री नरेन्द्रमोदी गौतमबुद्धनगर-जनपदस्य जेवर-क्षेत्रे नोएडा-अन्ताराष्ट्रिय-विमानपत्तनस्य प्रथम-चरणीयोद्घाटनं विहितवान्




सर्वकारः विकसित-भारतस्य निर्माणार्थं आधुनिक-आधारभूत-संरचनासु अभूतपूर्व-निवेशं करोतीति प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रतिपादितम् । गौतमबुद्धनगर-जनपदस्य जेवर-क्षेत्रे नोएडा-अन्ताराष्ट्रिय-विमानपत्तनस्य प्रथम-चरणीयोद्घाटनं विधाय श्रीमोदिना निगदितं यत् विगतैकादश-वर्षेषु आधारभूत संरचनायाः आयव्ययके षड्गुणाधिकं प्रवर्धितम्। रेलवे-विद्युतीकरणस्य विषये प्रधानमन्त्रिणा सूचितं यत् चतुर्दशाधिक-द्विसहस्रतमात् वर्षात् पूर्वं विंशति सहस्र-किलोमीटर-परिमितं आसीत्, तत् अधुना चत्वारिंशत् सहस्र-किलोमीटर-मितादधिकं सञ्जातम्। साम्प्रतं प्रायः शतप्रतिशतं ब्रॉड गेज़-सञ्चालस्य विद्युतीकरणं पूर्ण अभवत्।

प्रधानमन्त्रिणा विशेषतः उल्लेखितं यत् प्रथमवारं कश्मीर-उपत्यका तथा च उत्तर-पूर्व-राज्याणां राजधान्यः रेल-सञ्चालस्य माध्यमेन संबद्धाः भवन्ति। विगतैकदशके जलपोताश्रय-क्षमता द्विगुणाधिकं प्रवर्धिता, अन्तर्देशीय-जलमार्गाणां संख्या च निरन्तरं वर्धमाना अस्ति। प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रतिपादितं यत् जेवर-क्षेत्रे नोएडा-अन्ताराष्ट्रिय-विमानपत्तनस्य उद्घाटनं विकसित-उत्तरप्रदेशाय विकसित-भारताय च कश्चन नूतनाध्यायः वर्तते। श्रीमोदिना प्रोक्तं यत् सम्प्रति उत्तरप्रदेशः भारते सर्वाधिक-अन्ताराष्ट्रिय-विमानपत्तन-युक्तं राज्यम् अभवत्। अनेन विमानपत्तनेन आगरा-मथुरा-अलीगढ़-गाजियाबाद-इटावा-फरीदाबाद-सदृशानां पश्चिमोत्तरप्रदेशस्य अनेक जनपदानां विकासः भविष्यति। श्रीमोदिना प्रोक्तं यत् पश्चिम-एशिया-क्षेत्रे विगत-मासतः प्रवृत्त-युद्धेन बहवः देशाः खाद्य-पदार्थानां, तैलस्य, वातेन्धनस्य, उर्वरकाणां अभावं सम्मुखीकुर्वन्ति । श्रीमोदिना प्रतिपादितं यत् यद्यपि विश्वस्य प्रत्येकोऽपि देशः अनेन सङ्कटेन सह युध्यते, तथापि भारतं स्व-नागरिकाणां सामर्थ्येन पूर्ण-शक्त्या अस्य सङ्कटस्य प्रतिकारार्थं सज्जो वर्तते ।

## विश्व-व्यापार-सङ्गठने पीयूष गोयलस्य सम्बोधनम्



केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पीयूष गोयलः अब्रवीत् यत् विश्व-व्यापार-सङ्गठने 'उरुग्वे-चक्र' इत्यावधौ निर्मितानां विसङ्गतिनां निवारणं चर्चायाः मुख्यविषयो भवेत्। तेन प्रतिपादितं यत् सर्वेभ्यः सदस्य-देशेभ्यः उत्पादन क्षमता-वृद्धये, वृत्तिः-सृजनाय तथा वैश्विक व्यापारे सहभागितायै समानाः अवसराः भवेयुः। मन्त्री न्यगादीत् यत् बहुपक्षीय व्यापार-प्रणाल्या एतत् निश्चितं कर्तव्यं यत् नवाचारः, विकासः तथा अवसराः सर्वेषु सदस्येषु समानरूपेण वितरिताः स्युः। श्रीगोयलः विश्व-व्यापारे सङ्गठनस्य केन्द्रीय-भूमिकां सुदृ कर्तुं भारतस्य रचनात्मक-प्रतिबद्धतां पुनः दृकृतवान्।

## अमितशाहेन विशेष-गहन-पुनरीक्षणम् इति विषये निर्वाचनायोगस्य आलोचनायै तेन ममता बनर्जी निन्दिता

भारतीय-जनता-पार्टीतिदलस्य वरिष्ठनेता, केन्द्रीय गृहमन्त्री अमितशाहः पश्चिमबङ्गे ममता बनर्जी इत्यस्याः नेतृत्वयुतस्य तृणमूल-काङ्ग्रेस-सर्वकारस्य उपरि सुरक्षायां अनवधानस्य सहैव राज्यस्य आर्थिक-दुर्दशायाः गम्भीर आरोपं प्रक्षिप्तवान् । शाहः प्रतिपादितवान् यत् तस्याः अवैध प्रवासिभ्यः तुष्टीकरण-नीतेः कारणात् पश्चिमबङ्गस्य श्रमिकाः अल्पं वेतनम् आप्नुवन्ति । अस्मात् कारणात् तेषां स्थितिः दयनीया वर्तते। अमितशाहः कोलकातायां जनोगोनर-चार्जशीट-इति कार्यक्रमे सम्मिलितवान् । तत्र तेन एकः अभिलेखः विमुक्तः, यस्मिन् तृणमूल-काङ्ग्रेस-सर्वकारस्य पञ्चदश-वर्षाणां दमनं कुशासनञ्च प्रकाशितम् । विशेष-गहन-पुनरीक्षणम् इति विषये निर्वाचनायोगस्य आलोचनायै तेन ममता बनर्जी निन्दिता। सः अवदत् यत् अन्येषु राज्येषु अपि एषा प्रक्रिया अभवत्, परन्तु कुत्रापि न्यायालयस्य हस्तक्षेपावश्यकता न जाता।



शाहः तमिळनाडु केरल राज्ययोः उदाहरणं प्रदाय अवोचत् यत् तत्र विपक्षी दलानां शासने अपि एसाईआर- प्रक्रिया शान्तिपूर्णरीत्या सम्पन्ना। राजनैतिक-हिंसायाः विषये सः सूचितवान् यत् राज्ये विपक्षी दलानां त्रिशतादधिकाः जनाः हताः, येषु अधिकांशतः भारतीय जनता पार्टीतिदलस्य समर्थकाः आसन्।

## अद्य एकादशवादने प्रधानमन्त्री नरेन्द्रमोदी मन-की-बात कार्यक्रमः

अद्य एकादशवादने प्रधानमन्त्री नरेन्द्रमोदी आकाशवाण्या मन-की-बात इति कार्यक्रमावधौ स्वीयं मनोगतं देशस्य विदेशस्य च जनैः समं विनिमयीकरिष्यति। अयं हि अस्य लोकप्रिय-कार्यक्रमस्य द्वात्रिंशदधिकैकशततमो भागो भविष्यति। अस्य प्रसारणम् आकाशवाण्याः दूरदर्शनस्य च सर्वेषु केन्द्रेषु, 'ए, आई.आर. न्यूज' अन्तर्जालपुटे तथैव 'न्यूज-ऑन-ए आई आर' दूरभाष-तन्त्रांशे भविष्यति ।

## सुभाषितम्

**इन्द्रियाणां जये शूरो,**
**धर्मं चरति पण्डितः।**
**सत्यवादी भवेद्वक्ता,**
**दाता भवति वा न वा।।**

भावार्थः- जिस व्यक्ति ने अपनी इन्द्रियों पर विजय प्राप्त कर ली हो वही वास्तव में शूर है और जो व्यक्ति धर्म के सिद्धान्तों के अनुसार आचरण करता है वही व्यक्ति वास्तव में विद्वान् है। अतः वक्ताओं को अवश्य सत्यवादी होना चाहिए, चाहे वे दानशील हों या न हों।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## विशाखापत्तनम् इत्यतः देहलीं प्रति आगच्छतः 'इंडिगो' विमानस्य आपत्कालीन अवतरणं कारितम्

विशाखापत्तनमतः 'इंडिगो' विमानस्य आपत्कालीन-अवतरणं देहल्याः इन्दिरागान्धी-अन्तार्राष्ट्रीय-विमानस्थानके कारितम्, यतोहि एकस्मिन् प्रभागे शङ्का उत्तपना । देहलीं प्रति आगच्छतः अस्मिन् विमाने एकषष्ट्युत्तरैकशत प्रवासिनः आसन्। नागरिक विमानन-मन्त्रालयानुसारं प्रातः पादोन एकादशवादने विमानयाने 'पूर्ण-आपातकालः' घोषितः। देहली-अग्निशमन सेवया प्रोदीरितं यत् सूचना अवाप्य तत्र अग्निशमन वाहनानि तत्कालं प्रेषितानि आसन्, किन्तु विमानस्य काऽपि क्षतिः नैव अभवत् सर्वे प्रवासिनः च सुरक्षिताः सन्ति।

# राज्यसर्वकारः प्राकृतिक-कृषिं प्रवर्ध्य ग्रामीण-अर्थव्यवस्थां सुदृढां करोति - मुख्यमन्त्री सुक्खूः



हिमसंस्कृतवार्ताः - शिमला। उप-मुख्यसचेतकः केवलसिंहपठानिया आयव्ययके (Budget) २०२६-२७ मध्ये प्राकृतिक-कृषिं प्रवर्धयितुं मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य प्रयासानां प्रशंसां कृतवान्। सः मुख्यमन्त्रिणा सह मेलनं कृत्वा प्राकृतिक-कृषि-प्रवर्धनाय सर्वकारस्य प्रारम्भ-निर्णयार्थं कृतज्ञतास्वरूपं 'कचनार' पुष्पाणि समर्पितवान्। अस्मिन् अवसरे मुख्यमन्त्री अवदत् यत् राज्यसर्वकारः ग्रामीण-अर्थव्यवस्थायाः सुदृढीकरणाय निरन्तरं प्रयत्नशीलः अस्ति। अस्मिन् क्रमे धेनु-दुग्धस्य न्यूनतम-समर्थन-मूल्यं (MSP) वर्धयित्वा ६१ रुप्यकाणि प्रति-सेटकं तथा महिषी-दुग्धस्य न्यूनतम-समर्थन-मूल्यं ७१ रुप्यकाणि प्रति-सेटकं कृतम् अस्ति। एतदतिरिक्तं, दुग्धं सङ्ग्रह-केन्द्रेभ्यः नेतुं परिवहन-साहाय्यं ३ रुप्यकतः वर्धयित्वा ६ रुप्यकाणि प्रति-सेटकं कृतम्।मुख्यमन्त्री अवदत् यत् राज्ये प्राकृतिक-कृषिं प्रवर्धयितुं एतेषां सस्यानां न्यूनतम-समर्थन-मूल्ये ऐतिहासिक-वृद्धिः कृता अस्ति। गोधूमस्य (Wheat) यवस्य (Barley) च कृते ८० रुप्यकाणि प्रति-किलोग्रामं, मक्का-सस्यस्य कृते ५० रुप्यकाणि प्रति-किलोग्रामं तथा हरिद्रायाः (हल्दी) कृते १५० रुप्यकाणि प्रति-किलोग्रामं न्यूनतम-समर्थन-मूल्यं निर्धारितम्। आर्द्रकं (अदरक) प्रथमवारं 'एमएसपी' (MSP) व्याप्तौ सम्मिलितं कृतं, यदर्थं ३० रुप्यकाणि प्रति-किलोग्रामं दरं निश्चितं, येन कृषकाः साक्षात् लाभं प्राप्स्यन्ति। सः सूचितवान् यत् काङ्गड़ा-जनपदस्य ढगवार-क्षेत्रे २०० कोटिरुप्यकाणां व्ययेन एकं दुग्ध-प्रसंस्करण-संयन्त्रम् (Milk Processing Plant) अपि स्थाप्यते।

# HPRCA RESULT - टीजीटी मेडिकल-चयन-परीक्षायाः परिणामः उद्घोषितः




हिमसंस्कृतवार्ताः - हमीरपुरम्। हिमाचलप्रदेश-राज्य-चयन-आयोगेन (HPRCA) शनिवासरे 'पदकूटसंख्या २५००३' इत्यन्तर्गतं प्रशिक्षित-स्नातक-शिक्षक (टीजीटी-मेडिकल) इत्यस्य १६९ पदानां कृते आयोजितायाः सङ्गणक-आधारित-चयन-परीक्षायाः (CBT) परिणामः घोषितः। इयं परीक्षा १५ तः १७ दिसम्बर २०२५ दिनाङ्क-पर्यन्तं आयोजिता आसीत्। अस्याः परीक्षायाः परिणामः योग्यता-सूच्याः (Merit List) आधारेण सज्जः कृतः अस्ति।एतानि पदानि पूरयितुं प्रारम्भिक-शिक्षा-निदेशालयेन अनुरोधः कृतः आसीत्। अस्मिन् पदेभ्यः आहत्य १२,८६६ आवेदनानि प्राप्तानि आसन्, यानि सर्वाणि अनन्तिमरूपेण स्वीकृतानि। सङ्गणक-आधारित-परीक्षायां (CBT) ११,०६५ अभ्यर्थिनः उपस्थिताः आसन्, यदा तु १,८०१ अभ्यर्थिनः अनुपस्थिताः। योग्यता-सूच्याः आधारेण प्रमाण-पत्र-सत्यापनार्थं (Document Verification) ५०२ अभ्यर्थिनः चिताः, येषां सत्यापन-प्रक्रिया २ तः ७ मार्च २०२६ पर्यन्तं प्रचालिता।
चयनित-अभ्यर्थिनां सूची आधिकारिक-जालपुटे प्रसारिता आयोगेन टीजीटी (मेडिकल) इत्यस्य १६६ पदानां परिणामः सज्जीकृतः, परन्तु त्रीणि पदानि (OBC-WWF १, SC-WWF २) योग्याभ्यर्थिनाम् अभावात् रिक्तानि अभवन्। आयोगेन चयनित-अभ्यर्थिनां सूची स्वकीये आधिकारिके जालपुटे https://hprca.hp.gov.in/ इत्यत्र प्रसारिता अस्ति। आयोगस्य सचिवः डॉ. विक्रम-महाजन-महोदयः अवदत् यत् परिणामस्य निर्माणे पूर्णतया सजगता वर्तिता, तथापि यदि कापि तकनीकी-त्रुटिः भवति तर्हि आयोगः तस्याः निवारणाय अधिकारं सुरक्षितं धारयति।

# पश्चिम-एशिया-क्षेत्रे युद्धस्य स्थितिः अतीव गभीरा वर्तते



पश्चिम-एशिया-क्षेत्रे युद्धस्य स्थितिः अतीव गभीरा वर्तते । उपत्यका क्षेत्रस्य अनेकेषु भागेषु नूतनप्रक्षेपास्त्र-आक्रमणानि ड्रोन-आक्रमणानि च अभवन्, एतानि आक्रमणानि तावत् रक्षा-प्रणालीभिः मध्ये एव विफलीकृतानि। लेबनान देशे हिज्बुल्लाह-केन्द्रेषु इस्रायलदेशेन पुनः आक्रमणं विहितम् । अधिकारिभिः विज्ञापितं यत् बेरूत-दक्षिणी-लेबनान क्षेत्रयोः अनेके जनाः हताहताः अभवन्। प्रत्युत्तरे हिज्बुल्लाह-सङ्गठनेनापि उत्तर-इस्रायलदेशे निरन्तरं आक्रमणं कृतम्। इस्रायली-अधिकारिभिः पुष्टिकृतं यत् अस्मिन् सङ्घर्षे प्रथमवारं यमन-क्षेत्रात् अपि प्रक्षेपास्त्राणि प्रक्षिप्तानि, येन युद्धस्य भौगोलिक विस्तारस्य स्पष्टः सङ्केतः प्राप्यते। यद्यपि इस्रायलदेशे सद्यः कस्यापि महतः क्षतेः सूचना नास्ति, परन्तु अनेन नूतनाः युद्धाङ्गणाः उद्घाटिताः भवेयुः इति चिन्ता वर्धते । अपरतः संयुक्त अरब अमीराते वायु-रक्षा-प्रणाल्या आगच्छन्ति प्रक्षेपास्त्राणि ड्रोन-यन्त्राणि च मध्ये एव विनष्टीकृतानि। अबू धाबी-नगरस्य खलीफा आर्थिक क्षेत्रे पतितेन भग्नावशेषेण द्वयोः स्थानयोः अग्निः प्रज्वलिता। अनेन तावत् पञ्च-भारतीयाः व्रणिताः अभवन्। अधिकारिणां सूचनानुसारं इदानीं कोऽपि प्राणघातकः सङ्कटः नास्ति स्थितिः च पूर्णतया नियन्त्रणाधीना विद्यते।

# मुर्शिदाबादस्य रघुनाथगञ्जस्थले प्रवृत्त-हिंसायां निगृहीतानां उपद्रविणां संख्या त्रिंशत् अभवत्

मुर्शिदाबादस्य रघुनाथगञ्जस्थले प्रवृत्त-हिंसायां निगृहीतानां उपद्रविणां संख्या इदानीं त्रिंशत् अभवत् । अस्यां हिंसायां तावत् एकस्याः धार्मिक-संस्थायाः द्वौ प्रमुखापि सम्मिलितौ स्तः। आरक्षकाः अन्येषां उपद्रविणाम् अन्वेषणाय अधुनापि अन्वेषणाभियानं प्रचालयन्ति सहैव सामाजिक सञ्जालीय-माध्यमेषु प्रसारित चलच्चित्राणां साहाय्येनापि संदिग्धानां अन्वेषणं जायमानमस्ति । मुर्शिदाबादस्य आरक्षक-उपमहानिरीक्षकः अजित सिंह यादवः अपि स्वयं क्षेत्रे उपस्थितः सन् स्थितेः निरीक्षणे निरतो विद्यते।

# प्रधानमन्त्री नरेन्द्रमोदी 'नमो' तन्त्रांशेन 'मेरा बूथ सबसे मजबूत' संवाद-कार्यक्रमे असम-पुदुच्चेरी-राज्ययोः कार्यकर्तॄन् सम्बोधयिष्यति

प्रधानमन्त्री वरिष्ठ-भाजपा नेता च नरेन्द्रमोदी अस्य मासस्य त्रिंशत् दिनाङ्के 'नमो' तन्त्रांशेन 'मेरा बूथ सबसे मजबूत' संवाद-कार्यक्रमे असम-पुदुच्चेरी-राज्ययोः कार्यकर्तॄन् सम्बोधयिष्यति। सामाजिकान्तर्जालीय पटलस्य एकस्मिन् सन्देशे मोदी न्यगादीत् यत् विगत-दशके असम-राज्यस्य प्रगतिः सर्वेषां पुरतः स्पष्टा अस्ति, राज्यं च सर्वक्षेत्रेषु विकासपथि अस्ति। तेन अवलोकितं यत् निरन्तर-विकास-कार्याणां कारणात् जनाः पुनः पञ्चवर्षाणां कृते 'डबल-इञ्जन' एन.डी.ए. प्रशासनं चेतुं सज्जाः सन्ति।

# नेपालस्य पूर्व-प्रधानमन्त्री के. पी. शर्मा ओली निगृहीतः

नेपालस्य पूर्व-प्रधानमन्त्री के.पी. शर्मा ओली गतवर्षस्य 'जेन-जी' आन्दोलनस्य दमन-विषये निगृहीतः। अवधेयं यत् बालेन्द्र शाहस्य जेन-जी' आन्दोलनस्य निरीक्षण-आयोगस्य प्रतिवेदनानन्तरं निगडनं अभवत्।

# हिम-केयर' योजनातः लक्षशः जनाः नवजीवनं प्राप्तवन्तः, योजनां कलङ्कयितुं प्रयतते सर्वकारः - जयरामठाकुरः



हिमसंस्कृतवार्ताः - शिमला। आयव्ययक-सत्रे स्वास्थ्य-क्षेत्रस्य न्यूनता-प्रस्तावे भाषमाणः प्रतिपक्षनेता जयरामठाकुरः अवदत् यत् हिमाचलस्य निर्धन-वर्गीयाणां जनानां कृते अस्माकं सर्वकारेण 'हिम-केयर' योजना आरब्धा आसीत्, येन प्रदेशस्य शतशः निर्धनाः जनाः नवजीवनं प्राप्तवन्तः। वर्तमान-सर्वकारः इमां योजनां कलङ्कयितुं कार्यं करोति। जयरामठाकुरः अवदत् यत् केन्द्रीय-स्वास्थ्यमन्त्री जे.पी. नड्डा-महोदयः केन्द्रात् पर्याप्तं धनं राज्याय ददाति, परन्तु सर्वकारः तत् धनं व्ययितुं अपि न शक्नोति। सः परामर्शं दत्तवान् यत् सर्वकारः तस्य धनस्य सदुपयोगं कुर्यात्, यदि अन्यत् साहाय्यं अपेक्षितं तर्हि पुनः केन्द्रीय-स्वास्थ्यमन्त्रिणा सह वार्तां करोतु, ते प्रत्येकं साहाय्यार्थं सज्जाः सन्ति।

जयरामठाकुरः मुख्यमन्त्रिणं आक्षिपन् अवदत् यत्— "मुख्यमन्त्री प्रथमं ११०० कोटिरुप्यकाणां वञ्चनाम् (Scam) अवदत्, पुनः १०० कोटिः इति, तृतीयवारं च १२० कोटिः इति उक्तवान्।" सः स्पष्टं कृतवान् यत् अधुना यावत् कापि अन्वेषणा (Investigation) न अभवत्, किमपि विवरणं न आगतम्, तथापि सर्वकारः अस्याः योजनायाः विषये असत्यं वदति, यदर्थं मुख्यमन्त्री क्षमां याचेत। प्रतिपक्षनेत्रा उक्तं यत् 'हिम-केयर' तथा 'आयुष्मान' योजनासु प्रायः ४,००० रोगाणां चिकित्सायाः 'पैकेज' अस्ति।

## कैंसर-चिकित्सायाः ओवरी-प्रकरणस्य च स्पष्टीकरणम्

जयरामठाकुरः अवदत् यत् कैंसर-सदृशाणां गम्भीर-रोगाणां चिकित्सा अस्याः योजनायाः अन्तर्गतं अभवत्। सः मुख्यमन्त्रिणः तं आरोपं निराकृतवान् यस्मिन् मुख्यमन्त्री 'पुरुषस्य ओवरी-शल्यक्रियायाः' (Ovary Operation) वार्तां कृतवान् आसीत्। जयरामठाकुरः स्पष्टं कृतवान् यत् कैंसर-रोगेषु 'यूरिनल-कैंसर', 'ब्रेस्ट-कैंसर', तथा 'प्रोस्टेट-कैंसर' इत्येतेषां चिकित्सा हिम-केयर-माध्यमेन अभवत्। सः व्यङ्ग्यं अकरोत् यत्— "केनापि मुख्यमन्त्रिणे पुरुषस्य ओवरी-विषये भ्रान्ता सूचना दत्ता। मुख्यमन्त्री सर्वदा शीघ्रतायां भवति, अतः इयं दोषपूर्णा सूचना दत्ता।" सः अधिकं अवदत् यत् यदि कस्यापि रोगस्य प्रत्यक्षं पैकेज न भवति, तर्हि चिकित्सकाः रुग्णस्य जीवनरक्षणाय निकटवर्ति-पैकेज-अन्तर्गतं साहाय्यं ददति येन निर्धनः जनः कष्टं न अनुभवेत्।

## कोविड-कर्मचारिणां निष्कासनं स्वास्थ्य-संरचना च

प्रतिपक्षनेत्रा उक्तं यत् कोविड-महामारीकाले यदा केऽपि शव-दाहाय अपि न आगच्छन्ति स्म, तदा ये युवानः 'आउटसोर्स' (Outsource) माध्यमेन नियुक्ताः, सर्वकारः सत्तां प्राप्य तान् निष्कासितवान्। १३ मासां यावत् तेभ्यः वेतनं न दत्तं, अमानवीय-दृष्ट्या च ते बहिः कृताः। सः 'रोबोटिक-सर्जरी' विषये अपि प्रश्नं कृतवान् यत् अस्मिन् सर्वकारस्य रुग्णस्य च अत्यधिकं धनं व्ययिष्यति। सः आरोपं अकरोत् यत् स्टाफ-वेतन-वृद्धये यत् धनं उपयुज्यते, तत् 'एनएचएम' (NHM) इत्यस्य धनं वर्तते। चम्बा-हमीरपुर-चिकित्सालययोः उपकरण-काष्ठपीठिकादीनां (Furniture) अभावं प्रति अपि सः चिन्ता प्रकटीकृतवान्।

## प्रतिपक्षनेतुः परामर्शाः ध्याने स्थापयिष्यन्ते- धनीरामशाण्डिलः

स्वास्थ्यमन्त्री कर्नलः धनीरामशाण्डिलः जयरामठाकुरस्य न्यूनता-प्रस्तावे प्रत्युत्तरं ददत् अवदत् यत्— "ये परामर्शाः प्रतिपक्षनेत्रा दत्ताः, तेषां ध्यानं स्थापयिष्यते।" सः आश्वस्तं कृतवान् यत् ये 'आउटसोर्स' कर्मचारिणः कोविड-काले कार्यं कृतवन्तः, तेषां विषये सर्वकारः सहानुभूतिपूर्वकं विचारं करिष्यति।

# हिमाचले साइबर-वञ्चनायाः ५८५ प्रकरणाणि, त्रिषु वर्षेषु धूर्तैः १.५० अर्बुद-रुप्यकाणि लुण्ठितानि मुख्यमन्त्रिणा सूचना प्रदत्ता




हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेशे विगत-त्रिवर्षेषु 'साइबर-वञ्चनायाः' (Cyber Fraud) ५८५ प्रकरणाणि पञ्जीकृतानि सन्ति। अस्मिन् अन्तराले एक-अर्बुद-पञ्चाशत-कोटि (१.५० अरब) रुप्यकाणां वञ्चना अभवत्। आरक्षकैः (Police) २५८ आरोपिणः गृहीताः तथा १०.२५ कोटिरुप्यकाणां पुनरुद्धारः (Recovery) कृतः। डिजिटल-वञ्चनायाः सर्वाधिकं ५९ प्रकरणाणि काङ्गड़ा-जनपदे अभवन्। शनिवासरे प्रश्नकाल-समये भाजपा-विधायकस्य इन्द्रदत्तलखनपालस्य प्रश्नस्य उत्तरं यच्छन् मुख्यमन्त्री अवदत् यत्— "डिजिटल-वञ्चनातः रक्षणाय कठोराणि पदानि स्थाप्यन्ते।"डिजिटल-वञ्चनायाः निवारणाय प्रदेशस्य १४६ आरक्षक-स्थानेषु (Police Stations) 'साइबर-हेल्प-डेस्क' इति स्थापिताः। अष्टौ (८) अधिकारिणः विशेष-प्रशिक्षणं प्राप्तवन्तः, २९ अधिकारिणः च प्रशिक्षणं प्राप्नुवन्ति। मुख्यमन्त्रिणा उक्तं यत् ५८५ प्रकरणाणि तु पञ्जीकृतानि, परन्तु अनेकेषु प्रकरणेषु जनाः उपालम्भं (Complaint) अपि न कुर्वन्ति।

## जनपदानुसारं-विवरणम् (प्रकरणाणि धनराशिः च)

मुख्यमन्त्रिणा प्रदत्तानां दत्तांशानां (Data) विवरणं निम्नवत् अस्तिः

**सर्वाधिक-प्रकरणाणि-:** काङ्गड़ा (५९), बद्दी (५८), सोलनम् (४१), मण्डी (३०)।

**साइबर-आरक्षक-स्थानानि -** मण्डी (१००), धर्मशाला (८१), शिमला (८१) प्रकरणाणि।

**सर्वाधिक-लुण्ठित-धनराशिः-** 'साइबर-थाना शिमला' इत्यस्य अन्तर्गतं सर्वाधिकं ५५.६२ कोटिरुप्यकाणां वञ्चना पञ्जीकृता। 'साइबर-थाना मण्डी' मध्ये ३३.६४ कोटिः, धर्मशालायां च २५.९१ कोटिः रुप्यकाणि सन्ति।

**न्यूनतम-वञ्चना -** बिलासपुर-जनपदे अतीव न्यूना १४.९० लक्ष-रुप्यकाणां वञ्चना दृष्टा।

सः अवदत् यत् केषुचित् प्रकरणेषु बैङ्क-कर्मचारिणां संलिप्तता निष्कासिता, येन चत्वारः (४) बैङ्क-कर्मचारिणः बन्दीकृताः।

**कुत्र कियन्तः बन्दीकृताः (Arrests)?**

बन्दीकृतानां (गिरफ्तारी) विवरणानुसारं चम्बा-जनपदे १५, काङ्गड़ायां २८, सोलन-जनपदे २०, सिरमौर-जनपदे २४, बद्दी-क्षेत्रे २९ जनाः गृहीताः। तथैव साइबर-आरक्षक-स्थानेषु मण्डी-तः ४९ तथा धर्मशाला-तः ५५ जनाः बन्दीकृताः सन्ति।

# पुरीस्थे श्रीजगन्नाथ- संस्कृत- विश्वविद्यालये वाग्वर्धिनीसभायाः अष्टमं सत्रं समाचरितम्




28/03/26 तमे दिनाङ्के शनिवासरे पुरीस्थे श्रीजगन्नाथ- संस्कृत- विश्वविद्यालये वाग्वर्धिनीसभायाः अष्टमं सत्रं समाचरितम्। यत्र सृजनिका, प्रियङ्का, विजयः, एस. शुभश्री, शुभमः इत्येते छात्राः "गीता सुगीता कर्तव्या" इति विषयं समाश्रित्य स्वीयं वक्तव्यम् उपास्थापयन्।इयं वाग्वर्धिनी सभा प्रतिसप्ताहं शनिवासरे समाचर्यते। अत्रावसरे विभिन्नेभ्यः विभागेभ्यः चतुःपञ्चाशता छात्रैः सहभागः कृतः। समेषां मागदर्शनं न्यायविभागस्य आचार्या रश्मिता जेना महाशया कृतवती। सत्रेऽस्मिन् नामक्रीडायाः आयोजनं छात्राणां मोदाय अभूत्। सत्रसंयोजनम् विश्वविद्यालयस्य व्याकरणविभागस्य आचार्या डॉ. प्रज्ञा अकरोत्। कार्यक्रमे समेषां विभागाध्यक्षाणां मार्गदर्शनं सहयोगः च प्राप्तः। छात्राः उत्साहिनः आसन्। समेषां परिषत्सदस्यानाम् विशेषमार्गदर्शनेन कार्यक्रमः सुसम्पन्नः। कल्याणमन्त्रेण सभेयं सम्पोषिता।

# केन्द्रीय- जम्मू- विश्वविद्यालये श्रीअरविन्दस्य मानवैक्यदर्शनविषये द्विदिवसीया राष्ट्रीयसंगोष्ठी सम्पन्ना







**हिमसंस्कृतवार्ताः-** जम्मूनगरे स्थिते केन्द्रीयजम्मुविश्वविद्यालये शिक्षाशास्त्रविभागेन आईसीएसएसआर-संस्थायाः अनुदानेन “श्रीअरविन्दस्य मानवैक्यदर्शनम्- वसुधैव कुटुम्बकम् इति भारतीयमॉडलम्” इत्यस्मिन् विषये द्विदिवसीया राष्ट्रीयसंगोष्ठी आयोजिता। कार्यक्रमस्य उद्घाटनं सरस्वतीपूजया दीपप्रज्वलनेन च अभवत्।उद्घाटनसत्रे कुलपतिः प्रो. संजीवजैनमहोदयः अध्यक्षीयभाषणं कृतवान्। सः अवदत् यत् एषः विषयः अद्यतनसमाजस्य समस्यासु समाधानप्रदः अस्ति। तेन भारतीयमूल्यानां, विशेषतः “वसुधैव कुटुम्बकम्” इति भावनायाः, महत्त्वं प्रतिपादितम्। विभागाध्यक्षः संयोजकश्च प्रो. असितमन्त्रीमहोदयः अतिथीन् स्वागतम् अकरोत् तथा संगोष्ठ्याः उद्देश्यानि विवृतवान्।मुख्यवक्ता प्रो. सचिदानन्दमोहन्टीमहोदयेन श्री अरविन्दस्य दर्शनस्य वैश्विकप्रासंगिकता निरूपिता। तेन उक्तं यत् एतत् दर्शनं सांस्कृतिक- साम्राज्यवादस्य प्रतिकाराय तथा मानवैक्यस्य स्थापनाय उपयुक्तम् अस्ति। मुख्यातिथिः रूपेशकुमारः अपि अवदत् यत् भारतं श्रीअरविन्दस्य दृष्ट्या विश्वगुरुः भवितुम् अर्हति। सः “पञ्चपरिवर्तन” इति जीवनमूल्यानि अपि उल्लिखितवान्। विशिष्टातिथिः प्रो. सम्पदानन्दमिश्रः “समन्वययोगः” इति मार्गस्य वैश्विकसामञ्जस्ये महत्त्वं वर्णितवान्। संगोष्ठ्यां विविधेषु सत्रेषु देशस्य विद्वांसः स्वविचारान् प्रस्तुतवन्तः। तेषु सत्रेषु शिक्षायाः, संस्कृतेः, नीतिनिर्माणस्य च क्षेत्रेषु श्रीअरविन्दस्य दर्शनस्य उपयोगिता चर्चिता। प्रथमदिवसे धन्यवादप्रस्तावः डॉ. रवैलसिंहमहोदयेन कृतः।द्वितीयदिवसे अपि विविधैः विद्वद्भिः सारगर्भिताः विचाराः प्रस्तुताः। कुलपतिना पुनः श्रीअरविन्दस्य दर्शनं वैश्विकसामञ्जस्यस्य मार्गदर्शकम् इति उक्तम्। समापनसत्रे प्रो. रितुबक्षीमहोदया गुणवत्ताशिक्षायाः महत्त्वं प्रतिपाद्य भारतीय- शिक्षा- मॉडलस्य आवश्यकता दर्शिता। अन्ते प्रो. सम्पदानन्दमिश्रः समापनभाषणं कृतवान्।कार्यक्रमस्य अन्ते संयोजकेन प्रो. असितमन्त्रीमहोदयेन सर्वेषां प्रति कृतज्ञता व्यक्ता। एषा संगोष्ठी प्रतिभागिनां कृते अतीव प्रेरणादायिनी अभवत्, यतः अनेन म श्रीअरविन्दस्य मानवैक्यदर्शनस्य अद्यतनजगति प्रासंगिकता स्पष्टा अभवत्।



हिमसंस्कृतवार्ताः, ईदधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य चीने एका चतुरशीतिवर्षीया वृद्धा कृत्रिमबुद्धि-यन्त्रेण सह अनुरक्ता जाता। तेन यन्त्रेण 'उद्धत-अधिनायक' इति रूपं धृतं वर्तते। तया तस्मै अनेकानि प्रेम-पत्राणि लिखितानि।

**नन्दिनी-** कृत्रिम-यन्त्राणि मानवान् मोहयन्ति इति मया चिन्तितम्। अतिविचित्रम् एतत्। अपरं शृणु, एकेन पुत्रेण पित्रे आधुनिकं सङ्गणकं दत्तम्। सङ्गणकस्य गुणानां स्थाने तस्य पेटिकायाः दृढतया पिता प्रभावितः जातः। "इयं पेटिका कदापि न त्याज्या" इति तेन उक्तं वर्तते।

**काव्या-** पितृणाम् पेटिकासु प्रीतिः सर्वविदिता एव। सा पेटिका अधुना सुवर्ण-कोशः इव तेन रक्षिता अस्ति। अन्यच्च, अमेरिका-देशे एकेन मुख्य-प्रबन्धकेन स्वकर्मकरेभ्यः पञ्चदश- कोटि- रुप्यकाणां पुरस्कारः दत्तः। अति-कार्य-भारेण कर्मकराः श्रान्ताः जाताः, अतः एषः उदार-निर्णयः तेन कृतः अस्ति।

**नन्दिनी-** तादृशः पुरस्कारः यदि मया अपि प्राप्तः स्यात् तर्हि वरम्! सः प्रबन्धकः खलु स्तुत्यः। अन्ते, चीनदेशे एका महिला स्वदन्तैः एव कलाकृतिं रचयति। तया दन्तैः 'महाप्राचीरस्य' सुन्दरी प्रतिकृतिः निर्मिता अस्ति।

**काव्या-** दन्ताः न केवलं भक्षणाय, अपि तु शिल्पकलायै अपि उपयुज्यन्ते इति तया दर्शितम्। एषा वार्ता तु विस्मयकारिणी। धन्यवादः नन्दिनि।

# गीर-सोमनाथस्य लघुबालकेन रचितः इतिहासः- : ७०० श्लोकान् कण्ठस्थीकृत्य प्राप्ता 'गीताभूषण' उपाधिम्

**हिमसंस्कृतवार्ताः - जगदीश डाभी, वेरावलम्, गुजरातम्।** गुजरातराज्यस्य गीर-सोमनाथजनपदमन्तर्गतस्य उना-प्रान्तस्य एकः मेधावी छात्रः स्वप्रतिभया समग्रराज्यं गौरवान्वितं कृतवान्। उना-प्रान्तस्य 'सर्वकारीय श्रीसोनारी प्राथमिक-शाला-पीएमश्री' विद्यालयस्य चतुर्थकक्षायाः छात्रः वेदः लखमणभाई वाझा श्रीमद्भगवद्गीतायाः सर्वेषां ७०० श्लोकानां कण्ठस्थीकरणं कृत्वा कीर्तिमानं स्थापितवान्।

**असाधारणकौशलम्-:** अल्पवयसि (चतुर्थकक्षायाम्) एव पूर्णगीतायाः शुद्धोच्चारणपूर्वकं कण्ठस्थीकरणम्।

राज्यस्तरीयसम्मानम्: छात्रस्य एतां विशिष्टोपलब्धिं दृष्ट्वा गुजरातराज्यस्य माननीय- शिक्षामन्त्रिणा तस्मै 'गीताभूषण' इति प्रतिष्ठितोपाधिः प्रदत्ता।


**पुरस्कारराशिः-:** अस्मिन् राज्यस्तरीये कार्यक्रमे वेदाय सम्मानपत्रं, विजयचिह्नं (ट्राफी) तथा च ५१,००० (एकपञ्चाशत् सहस्रं) रूप्यकाणां पुरस्कारराशिः समर्पिता।

**विद्यालयस्य हर्षोल्लासः-** वेदस्य अनया महत्या उपलब्ध्या विद्यालयपरिवारे ग्रामे च अतीव उत्साहस्य वातावरणं वर्तते। विद्यालयस्य प्रधानाचार्यः शिक्षकाः च तं प्रति अभिनन्दनं प्रकटितवन्तः। विद्यालयपक्षतः उक्तं यत्— "वेदः न केवलं विद्यालयस्य अपितु सम्पूर्णस्य प्रान्तस्य गौरवम् अस्ति। तस्य एकाग्रता परिश्रमः च अन्येषां छात्राणां कृते प्रेरणास्रोतं भविष्यति।“ श्रीमद्भगवद्गीतायाः ज्ञानं सनातनसंस्कृतेः आधारः अस्ति, तथा च वेदेन एतादृशं कार्यं कृत्वा आधुनिकयुगे अपि संस्कृतसंस्काराणां महत्त्वं प्रतिपादितम्।





# ब्राह्मणी-नकुलयोः कथा



## १. स्नेहपूर्णं गृहम्-

कस्मिंश्चित् नगरे एकः ब्राह्मणः तस्य पत्नी च निवसतः स्म। तयोः एकः लघुः पुत्रः आसीत्। ब्राह्मण्याः एकः पालितः नकुलः (Mongoose) अपि आसीत्। सा नकुलं स्वपुत्रवत् स्नेहेन पालयति स्म। नकुलः अपि बालेन सह क्रीडति स्म, तस्य रक्षणं च करोति स्म।
परं ब्राह्मणी सर्वदा चिन्तयति स्म— "अयं तु जन्तुः अस्ति, कदाचित् मम पुत्रं न दंशेत्।"

## २. घटनायाः आरम्भः

एकदा ब्राह्मणी जलं आनेतुं घटं गृहीत्वा नदीं प्रति गन्तुम् उद्यता आसीत्। सा ब्राह्मणम् अवदत्— "आर्यपुत्र! अहं जलार्थं गच्छामि, भवान् शिशोः ध्यानं रक्षतु। नकुलं प्रति मम विश्वासः नास्ति।"
तस्मिन्नेव समये ब्राह्मणस्य पार्श्वे भिक्षायाः निमन्त्रणम् आगतम्। सः अचिन्तयत्— "पुत्रः तु सुप्तः अस्ति, नकुलः च अत्रैव तिष्ठति। अहं शीघ्रं गत्वा आगच्छामि।" इति विचार्य ब्राह्मणः अपि निर्गतः।

## ३. नकुलस्य पराक्रमः

तस्मिन् समये एकः कृष्णसर्पः (Cobra) बिलतः निर्गत्य सुप्तस्य शिशोः समीपम् आगच्छत्। नकुलः तं सर्पं दृष्टवान्। सः झटिति सर्पस्य उपरि आक्रमणं कृतवान्। दीर्घकालं यावत् युद्धं सञ्जातम्। अन्ते नकुलः तं दुष्टसर्पं खण्डशः (तुटयित्वा) मारितवान्।
नकुलस्य मुखं पादौ च रक्तेन रञ्जितौ अभवन्। सः अतीव प्रसन्नः अभवत्— "मया स्वामिनः पुत्रः रक्षितः"
इति मत्वा सः गृहस्य बहिः उपविश्य ब्राह्मण्याः प्रतीक्षां कर्तुं आरब्धवान्।

## ४. अविवेकपूर्णः निर्णयः

यदा ब्राह्मणी जलं नीत्वा गृहम् आगता, तदा सा द्वारि रक्तेन प्लावितं नकुलं दृष्टवती। सा विना विचारं अचिन्तयत्— "नूनं अनेन दुष्टेन मम पुत्रः भक्षितः!"
क्रोधावेशे सा हस्तस्थं जलयुक्तं भारी-घटं नकुलस्य उपरि अक्षितवती। तेन प्रहारेण सः निर्दोषः नकुलः तत्क्षणमेव मृतः।

## ५. अनुतापः (Remorse)

यदा सा धावन्ती अन्तः गृहं प्रविष्टा, तदा सा अपश्यत् यत्— पुत्रः तु सुखेन शेते, पार्श्वे च एकः मृतः कृष्णसर्पः पतितः अस्ति। एतत् दृष्ट्वा ब्राह्मण्याः हृदयम् अतीव दुःखितं जातम्। सा उच्चैः विलपन्ती अवदत्— "हा हन्त! मया किं कृतम्? मम रक्षकः एव मया मारितः!" सा आजीवनं तं नकुलं स्मृत्वा दुःखिता अभवत्।

**शिक्षा (Moral of the Story):**

**अस्याः कथायाः प्रसिद्धः श्लोकः अस्तिः**

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**
**वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥**

(अर्थात्— सहसा (झटिति) किमपि कार्यं न करणीयम्। अविवेकः आपदाम् आश्रयः भवति। यः मनुष्यः विचार्य कार्यं करोति, तं लक्ष्मीः स्वयं वृणोति।)

हिमसंस्कृतवार्ताः




# संस्कृतं मधुरं सदा- १८

परमपिता परमेश्वरः सदैव पूर्णः, अविनाशी, अखण्डरूपश्च वर्तते। उपनिषच्छान्तिपाठः कथयति-
**ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**
**ॐ शान्तिः शान्तिः शान्तिः।**
अखिले ब्रह्माण्डे जडचेतनात्मकं यत् किमपि वस्तु विद्यमानमस्ति, तत्सर्वं परमेश्वरेण व्याप्तमस्ति। तमीश्वरं विज्ञाय त्यागपूर्वकं, जगति स्थितं वस्त्वादिकम्, अनासक्ततया भोक्तव्यम्, यतोहि धनादिभोग्यवस्तु न कस्यापि स्वकीयं वर्तते।
शास्त्रविहितानि कर्माणि कुर्वन् मनुष्यः शतवर्षाणि यावत् जीवितुम् इच्छां कुर्यात्। एवं प्रकारेण त्यागभावेन ईश्वरोद्देश्येन च कृतं कर्म तस्मिन् मनुष्ये लिप्तं न भवति, अर्थात् तत् तस्य कृते बन्धनकारकं न भवति। अन्यथा मुक्तिप्राप्तये एतदतिरिच्य मार्गान्तरं न क्वापि विद्यते।
प्रसिद्धाः आसुरिकलोकाः तु बहुधा सन्ति, नानाविधाः योनयः सन्ति, नरकनामधेयः दुःखप्रदलोकः अपि वर्तते। एते लोकाः अज्ञानक्लेशदुःखयुतेन अन्धकारेण सततम् आच्छादिताः सन्ति। ईश्वरविमुखाः, आत्महन्तारः वा मनुष्याः मरणानन्तरं तान् भयङ्करान् लोकान् अभिगच्छन्ति। सः परमेश्वरः एकः, अचलः, मनसोऽपि तीव्रगतिमान्, सर्वेषाम् आदिः, ज्ञानस्वरूपः, सर्वेषाम् अभिज्ञाता च वर्तते। इन्द्रादिदेवाः अपि तं न कदापि प्राप्तवन्तः, न वा ज्ञातवन्तः एव। परं ते देवाः, महर्षयः च तस्य परमेश्वरस्य अनुसन्धानार्थं हि सततं धावन्तः स्युः। परमेश्वरस्य सत्ताशक्त्यादिबलात् हि वायुरादिदेवाः जलवर्षणं कुर्वन्तः, जीवेभ्यः प्राणधारणशक्त्यादिकं च प्रदाय प्रवर्तमानाः सन्ति।
सः परमेश्वरः चलति अपि, नहि चलति अपि, सः दूराद्दूरेऽपि वर्तते, सः अत्यन्तं समीपे अपि स्यात्। अस्य अखिले जगति सः बाह्याभ्यन्तरेषु, सर्वत्र च परिपूर्णोऽस्ति, इति।



हिमसंस्कृतवार्ता
✍ असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# अकबरबीरबलयोः संवादः



## १. कति काकाः सन्ति?
## (How many crows?)

एकदा अकबरः बीरबलं पृष्टवान्— "बीरबल! कथय मम राज्ये कति काकाः (Crows) सन्ति?"
बीरबलः विहस्य अवदत्— "महाराज! अस्मिन् नगरे पञ्चाशत् सहस्रं त्रिशतं चत्वारिंशत् (५०,३४०) काकाः सन्ति।"
अकबरः चकितः सन् अपृच्छत्— "यदि गणना अधिका भवेत् तर्हि?"
बीरबलः अवदत्— "तर्हि अन्यनगरात् काकानां बान्धवाः अतिथिरूपेण आगताः स्युः।"
अकबरः पुनः अपृच्छत्— "यदि न्यूनाः स्युः तर्हि?"
बीरबलः झटिति अवदत्— "तर्हि अस्मान् नगरात् काकाः अन्यत्र बान्धवानां गृहं गताः स्युः।"
अकबरः तस्य चातुर्येण प्रसन्नः अभवत्।

## २. कः श्रेष्ठः?
## (Who is great?)

अकबरः बीरबलं पृष्टवान्— "बीरबल! किं मम अपेक्षा (Than me) ईश्वरः अधिकः शक्तिशाली अस्ति?"
बीरबलः अवदत्— "आम महाराज! भवान् ईश्वरतः अपि महान् अस्ति।"
अकबरः आश्चर्यचकितः अभवत्— "कथम् एतत् सम्भवति?"
बीरबलः शान्ततया अवदत्— "महाराज! यदि भवान् कञ्चित् दण्डयितुं इच्छति, तर्हि तं राज्यतः बहिः (Exit from state) निष्कासयितुं शक्नोति। किन्तु ईश्वरः कञ्चित् अपि स्वराज्यतः (संसारतः) बहिः निष्कासयितुं न शक्नोति, यतोहि सर्वं तस्यैव राज्यम् अस्ति!"
अकबरः तस्य उत्तरं श्रुत्वा उच्चैः हसितवान्।